## ।। द्वात्रिंशोऽध्याय: ।। Chapter-32

वसिष्ठ उवाच :- ततोगच्छेन्नृपश्रेष्ठ दुर्द्दरस्थलमुत्तमं[१] ।।
यत्र पूर्वं तपस्तेपे गन्धर्वोदुर्द्दर: पुरा ।। १

स्वच्छाम्बुस्तत्र कूपोऽस्ति दुर्द्दरेश्वर सन्निधौ ।।
यत्र स्नात्वा च पीत्वा च नरोनिर्वाणमृच्छति ।। २

मान्धातोवाच :- कुत्रासिद्दुर्द्दर: पूर्वं गन्धर्वोमुनिसत्तम ।।
कथं श्रीमालमासाद्य तप्तवानतुलं तप: ।। ३

वसिष्ठ उवाच :- विश्वावसु कुले जातो गन्धर्वोऽङ्गिरस: सुत:
देवदारु वने पूर्वं दुर्द्दरोनृद्धिशांगतै ।। ४

स दण्डिनं समासाद्य देवं पर्यचयच्चिरं ।।
पुष्पैर्धूपैस्तु नैवेद्यैस्तथानीराजनादिभि: ।। ५

प्रात: स्नात्वा (२-नात्वा) समभ्यर्च्य दण्डपाणिं महेश्वरं ।।
तत: कृतफलाहारो मध्यान्हे दुर्द्दरोनृप ।। ६

----

टि० श्लोक पंचमस्य ~~श्लोक~~ अंतिम पंक्ति    श्लोक षष्ठस्य प्रथम पंक्ति स्च नास्ति

१ ग तमं

आश्रित्य देवदारूणां छायां परिमलाकुलाम् ।
वीणया मूर्छनालापं कुरुते सततं सुधीः ॥ ७

निशम्य मधुरं तस्य वीणाक्वाणं मनोहरम्[1] ।
मृगीभिः सार्द्धमायान्ति मृगाः साश्रुजलेक्षणाः ॥ ८

देवदारुतलेयाद्वयं[2] गायति वीणया ॥
न गच्छन्ति खगास्तावदाहाराय वनान्तरम् । ९

एवं तस्य वने राजन् दंडपाणि निषेवणात् ॥
गतानि दशवर्षाणि गन्धर्वस्य मुहूर्तवत् ॥ १०

कदाचिदथ तत्रैव वीणया गायतः कलम् ॥
आजगाम रमानाम गन्धर्वी नान्यपूर्विका ॥ ११

तन्निशम्य कलक्वाणं हृतश्वापदचेतसम् ।
मनसा कामयामास गन्धर्वं स्मरसन्निभम् ॥ १२

---

१ वी मनोरमम्

२ ह तुल्यां

देवदारुतरोः शाखामवलम्ब्य नितम्बिनी ॥
उन्मनस्का वने तस्थौ मुग्धा चित्रगता यथा ॥ १३

गन्धर्वोऽपि धरापीठे विपञ्चीम् अवमुच्य वै ॥
जगाद वचनं तन्वीं हृद्यवीणाक्वणादपि ॥ १४

दुर्धर उवाच :- कात्वं वदविशालाक्षि कुतो वागमनं तव ॥
परिग्रहो सि वा कस्य सर्वं कथय नः शुभे ॥ १५

रमोवाच:- सुताहं मेघनादस्य गन्धर्वस्य महात्मनः ॥
इह त्यक्त्वा सखीवर्गमागतास्मि रिरंसया ॥ १६

दुर्धर उवाच :- साभिलाषं त्वयि शुभे मनो मे वर्त्तते शुभम् ॥
इन्दोरिव कुमुद्वत्यां कुमुदामोदसम्पदि ॥ १७

तदादिश विवाहाय प्रसादो यदि ते मयि ॥
अथ चेत् कोपि दाता स्यात् प्रार्थयामि तमङ्गने ॥ १८

----

१ ई मुच्यते
२ ए १ में इति युक्तः पाठः ।
३ ए कात्संवदा विशालक्षि ।

---

रमो वाच :- मन एव मृगाक्षीणां यत्र याति निसर्गतः ।।
न याचा तत्र नोत्सर्गः प्राबीण्यम् अनुबिन्दति ।। १६

दुर्द्धर उवाच :- यथैवं मृगमृगशावाक्षि हृदये तव वर्तते ।।
अलं तदुपरोधेन मम स्मरसहायिनः ।। २०

वसिष्ठ उवाच :- इत्थमाकर्ण्य कर्णान्तिनयना मदनातुरा ।।
वेपमाना स्विन्नतनु नोत्तरं प्रत्यपद्यत ।। २१

अथ तां दुर्द्धरो राजन् मेघनाद तनूद्भवाम् ।।
उपयेमे विवाहेन गान्धर्वेण तनूदरीम् ।। २२

तया सह महाराज तस्मिन् दारूवने युवा ।।
चिक्रीड दशवर्षाणि पराणि स तु दुर्द्धरः ।। २३

नदीतटेषु पुण्येषु शैलश्रृंगेषु कामिवत् ।।
वनेषु लवणाम्भोधेः कूलेषु विविधेषु च ।। २४

---

बी १ वेपमानतनूरूहम् ( ए १) उपयेम

अन्वरज्यत्प्रतितरां कामयामास कामिनी ।।
न्यस्तं मनस्तया तत्र तस्यां तेनापि निर्भरम् ।। २५

तयोस्तु देहभेदोऽभून्न प्राणानां कथंचन ।।
क्षणं न रमते कान्तमृते गन्धर्वनन्दिनी ।। २६

गन्धर्वोऽपि तयाहीनो रतिं बध्नाति न क्वचित् ।।
रमां मनोरमां प्राप्य क्रीडन् सर्वत्र दुर्द्धरः ।। २७

यावन् मध्याह्नमीशानम् अर्चयत्यनिशं शिवम् ।।
पुष्पैर्धूपैस्तथा गन्धैर्दृढैर्वी[2]णोपगायनैः ।। २८

अथ सा मृगशावाक्षी गर्भाधानवती नृप ।।
सौरम्यं च परं लेभे कदली व महावने ।। २९

प्रतिपच्चन्द्रलेखेव विमले व्योमनि स्थिता ।।
देवदारुवने तन्वी गर्भचिह्नैर्[1]विराजत ।। ३०

---

१ ए वराजत ( ए २) विणायगायनैः

दार्घनाङ्के बिसकण्ठीव हंसीव कमलाकरे ।। ३१

रेवाकूले च करिणी ससत्त्वाऽऽभवो रमा ।। ३२

ततः कालेन सा तन्वी सहगर्भा व्यपद्यत ।।
प्रसूति समयं प्राप्य गर्भ वेदनया रमा ।। ३३

अथ तां वीक्ष्य चार्वङ्गीम प्राप्तप्रसवां बने ।
चन्द्रलेखामिवाकाशाच्च्युतां स दुर्दरोऽब्रवीत् ।। ३४

दुर्द्दर उवाच :- प्रिये प्राणापहारो यं तव केन कृतोऽद्य वै ।।
प्रविश्य जठरं भीरु गर्भव्याजान्ममारिणा ।। ३५

केतकी-व विना गन्धं तनुस्ते प्राणवर्जिता ।।
कथं चिदपि ते तन्वि मनोभृङ्गेण मुच्यते ।। ३६

निम्नगा जलहीनेव चन्द्रलेखेव निष्कला ।।
पद्मिनी पद्महीनेव प्रिया भाति व्यसुर्मम ।। ३७

मां धिगस्तु सरोजाक्षि तव दीर्घप्रवासनै ।।
विसृज्य नयनाम्बूनि करोमि स्थितिमच यद् ।। ३८

विमलापिप्रौ रम्यै प्रसन्नवदनाम्बुजा ।।
न शरच्चन्द्रहीनेव व्यसुर्ासि गता भुवि ।। ३६

किमत्र हि मया कार्यमरण्येरुदता भृशम् ।।
प्रियादेहं परित्यज्य यथा काष्ठमचेतनम् ।। ४०

हन्त शून्या दिश: सर्वा: प्रियाविरहिणां नृणाम् ।।
यथा चक्षुर्विहीनानां वस्तुरूपमपश्यताम् ।। ४१

हन्तप्रिया परिष्वंग परिभ्रष्टमिदं वपु: ।।
निर्माल्यमिव मे त्याज्यं भविष्यति न संशय ।। ४२

शरीरं मदकर्पूर चन्दनादिभिरन्वहम् ।।
अनुलेप: कृतोभून्मे दैयस्तत्रानतोऽधुना ।। ४३

---

१ बी मम प्रिये ( ए ह्ये नृयनाम्बूनी

अथवाहं तपोत्युग्रं करिष्ये दयितां विना ।।
दु:खमेवं यथाभूयो न भविष्यति कर्हिचित् ।। ४४

वसिष्ठ उवाच :- इत्थं विलाय बहुधा दुर्द्धरोदंडकावने[1] ।।
संस्कारं सुश्रुवस्तस्याश्चकार करुणं रुदन् ।। ४५

ततोदण्डिनमामन्त्र्य प्रियाविरहित: प्रभुम्
तीर्थयात्राक्रमेणैव श्रीमालं क्षेत्रमाययौ ।। ४६

स्थलीकं समासाद्य बदरीपादपा कुलम् ।।
स्थित: स दुर्द्धरो राजन्परित्यक्तमदस्तदा ।। ४७

प्रतिष्ठाप्य महल्लिङ्गं वालुकामयमुत्तमम् ।।
पूजां चकार विधिवत्पुष्पधूपानुलेपनै: ।। ४८

चान्द्रायणपरो दान्त: कुरुते बदिराशनम्[2][3] ।।
न क्षीणाया धृतिं लिप्सुर्न भोगै: परिपेशलै: ।। ४९

----

१बी ई दंडकानने
२ ब- डी ई- बदिरासनाम्
बी ३ बदराशनम्

शिवं प्रसादयन्त्येष नासाग्रप्रहितेक्षणः ।।
एवं तपस्यतस्तस्य गन्धर्वस्य विशांपते ।। ५०

प्रत्यक्षोऽभून्महादेव उमया सह शूलधृक् ।।
भासयन् सहसा व्योम महीं च महसां निधिः ।। ५१

तमुवाच रमाकान्तमुमापतिरहो नृप ।। ५२

देवदेव उवाच :- ब्रूहि दुर्द्धर गन्धर्व घृतो यस्ते मनोरथ : ।।
दास्यामि तन्न सन्देहस्तपसानेन तोषितः ।। ५३

गन्धर्व उवाच :- देवदेव जगन्नाथ शिवावल्लभ शंकर ।।
तामेव देहितां[1] देहि परितुष्टोऽसि मे यदि ।। ५४

प्रसन्ने त्वयि देवेश देवेन्द्र त्वादिकं फलम् ।
नृणामपि भवत्येव यावन्मन्वन्तरं हरेः ।। ५५

शम्भु उवाच :- दयिता तव गन्धर्व देव्याः साभूत्प्रिया सखी ।।
अपराधवशाच्चैषा जाता गन्धर्वकन्यका ।। ५६

---

१ ए देहि

गर्भान्ते ऽनुग्रहस्तस्या जातस्तेनोमया कृत: ।।
कैलासस्योत्तरे शृंगे शिवा केलि वने रमा ।।
खेचरीमध्यगा बाला नित्यं क्रीडति दुर्द्धर ।। ५७

दुर्द्धर उवाच :- किमिदं मन्यसे नाथ मम त्वद्भक्तिभाविन: ? ।।
देवदारुबने चापि सेवितोसि चिरं यत: ।। ५८

शम्भु उवाच :- देवी सख्यपदादर्वाक् पदमैन्द्रमपि ध्रुवम् ।।
इन्द्रस्यापि भवेद्भ्रंशो[1] मद्भक्तस्य न तु क्वचित् ।। ५९

ददामि तदपीदं ते सायुज्यं नन्दया सह[2] ।।
नन्दी नाम गणो भूत्वा कैलासशिखरे भवान् ।। ६०

एकमन्वंतरं यावन्नन्दया सह वत्स्यति ।। ६१

वसिष्ठ उवाच :- इतीशस्य वच: श्रुत्वा परितुष्टस्य पार्थिव ।।
देवीजगज्जनित्री सा दुर्द्धरं वाक्यमब्रवीत् ।। ६२

----

१ ए भवेम्भ्रंशो
२ ए नन्दयासह

देव्य वाच :- वरं वरय गन्धर्व यदि ते हृदि किञ्चन ।।
समीहितमिहास्ते तत् परितुष्टा ददामि ते ।। ६३

दुर्द्धर उवाच :- दुर्लभं देवि लोकेऽस्मिन् प्राप्तं गणपदं मया ।।
त्वत्तस्तदपि देवीदं प्रार्थयामि कृतादर: ।। ६४

तीर्थमेतन्महादेवि मन्नाम्ना भुवि विश्रुतम् ।।
अस्तु किं चात्र शर्वेण सहलिङ्गे चिरं वस ।। ६५

देव्यु वाच :- अहमत्र निवत्स्यामि सह देवेन शम्भुना ।।
भविता यत्र भूभागो दुर्द्धरस्थलसंज्ञया ।। ६६

शम्भु उवाच :- स्नानं येऽत्रकरिष्यन्ति पुण्ये वै दुर्द्धरस्थले ।।
दीनानाम[1]पि पापानां स्वर्गस्ते[2]षां न दुर्लभ: ।। ६७

-------

१ बी ई दिनमेकमपि प्रह्वा: स्वर्गस्तेषां
२ ए स्वर्गस्ते

पौषमासस्य सम्प्राप्ते बहुले प्रतिपद्दिने ।।
वीणाप्रदायिनो मत्यां यास्यन्ति शिवसन्निधौ ।। ६८

उषित्वा रजनीमेकां मनुष्या दुर्द्धरस्थले ।।
दुर्द्धरेश्वरमभ्यर्च्य न जायन्ते पुनर्नवा: ।। ६९

वसिष्ठ उवाच :- इत्युक्तान्तर्दधे देव: शिवया सहशंकर ।।
अपराह्णे यथा राजन्मृगतृष्णा जलाश्रय: ।।[1] ७०

गन्धर्वोऽपि तपस्तप्त्वा श्रीमाले बदरीवने ।।
नन्दयात्[2]सायुज्यं लेभे शम्भुप्रसादत: ।। ७१

दुर्द्धरस्थलमाहात्म्य मेतत्ते कथितं मया ।।
श्रुत्वा यन्मानवो राजन् प्रियाविरहितो भवेत् ।। ७२

-०-

इति श्री स्कंदपुराणे एकाशिति साहस्त्र्यां
संहितायां ब्राह्मविभागे तृतिय परिच्छेदे श्रीमालमाहात्म्ये
दुर्द्धरस्थलमाहात्म्य नाम द्वात्रिंशोऽध्याय: ।। ३२।।

---

१ ख- डी जलाश्रम: जलाशय इतिवा स्यात्
२(ए) सायोज्यम्